International Journal of Applied Research 2021; 7(3): 37-39




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(3): 37-39
www.allresearchjournal.com
Received: 17-01-2021
Accepted: 23-02-2021

**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**रतीश कुमार मिश्र**
शोधार्थी, उफरदाहा, भाया – नेहरा, जिला–दरभंगा, बिहार, भारत

# धर्मशास्त्रे व्यवहारतत्त्वस्य परिचयः

**रतीश कुमार मिश्र**

**प्रस्तावनाः**
ग्रन्थोऽयं आनन्दकन्दसच्चिदानन्दस्य मत्र्लाचरणपूर्वकं व्यवहारदर्शनात् प्रारभ्यते। तत्र प्रथमतः याज्ञवल्क्योक्तव्यवहारलक्षणम्, तस्य च मैथिलीजनानां अपि च शुकपाणिदिशा व्याख्यानोद्धरणे प्रारब्धते। तदनन्तरं व्यवहारदर्शने अधिकारिनिर्णक्रमे कात्यायनोक्तप्राड्विवाकलक्षणम् तस्य च स्वीयमतानुसारेण व्याख्यानम्, व्यवहारसभायां सभ्या, तत्र च ब्राह्मणस्य प्राथम्यम्, शूद्रस्य निषिद्धत्वम्विषये विचार्यते। समनन्तरं कात्यायनदिशा व्यवहारस्य व्युत्पत्तिः तस्य च व्याख्यानम्, बृहस्पति–मतानुसारं व्यवहारस्य महत्त्वम्, व्यवहारनिर्णये धर्मशास्त्रयोंः विरोधे लोकव्यवहारस्य आदरणीयत्वं तत्र च बलाबलत्वविषये निर्णातं विद्यते। तथाच कात्यायनमतानुसारं सभ्यानां गुणाः तेषाञ्च योग्यता सभालक्षणम्, अमरोक्त–सभा–परिभाषा, तस्य च व्युत्पत्ति–विषये निबन्धो वर्त्तते। तत्पश्चात् व्यवहारनिर्णयस्य कालः, सभायां चतुष्पादाः तत्र अर्थित्वनिर्णयं, वादिनः प्रतिनिधिनिद्धरिणम्, कुत्र प्रतिनिधि र्न नियोक्तव्यो, अनासेध्याः, अप्राप्तव्यवहाराः, हीनवादी, प्रत्यभियोगं, सभापतेः कर्त्तव्यम्, सद्यः व्यवहारः, तत्र च कात्यायनोक्तविशेषः, अपि च बृहस्पति–व्यास–हारीतादीनां तद्विषये अपवादत्वविषये समुल्लेखो वर्त्तते। तदनुक्रमेण बृहस्पत्युक्तचतुष्पाद्व्यवहारविषये उल्लेखो वर्त्तते। तस्य च द्विपादत्वेन अपि अन्तर्भावयति एषः रघुनन्दनः। तत्र प्रथमतः भाषापादस्य विचारं विधाति सः। तदानीं प्रथमतः कात्यायनबृहस्पत्योः भाषास्वरूपमुद्धृत विद्यते।
अनेन भगवता रघुनन्दनेन व्यवहारतत्त्वस्य वर्णना–प्रसत्रे सर्वादौ व्यवहारस्य पादनिर्णयो विहितः। तत्र बृहस्पतिमतं समुद्धृत्य व्यवहारपादानां निर्णयः प्रतिपाद्यते। पूर्वपक्षस्मृतः पादः, द्वितीयपादः उत्तरं, तृतीयोपादस्तु क्रियापादः चतुर्थः निर्णयाख्य इति। मिथ्योत्तरे तु व्यवहारः चतुष्पादात्मको भवति। प्रत्यवरस्कन्दने अपि तथैव सत्योत्तरे तु व्यवहारः द्विपादात्मकः। यद्यपि सम्प्रतिफ्क्तावपि निर्णयोऽस्ति तथापि उत्तरवादिनैव भाषार्थस्य अत्रीकृतत्वेन क्रियासाध्ये न भवतीति तत्र प्रथमतः भाषापादः। तत्र भाषास्वरूपनिर्णयक्रमे कात्यायनबृहस्पत्योः वचनोद्ध्रियते। यथा–

> प्रतिज्ञा दोषनिर्मृक्तं साध्यं सत्कारणान्वितम्।
> निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः[1]।।
> स्वल्पाक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
> विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः।।
> यदात्वेवंविधः पक्षः कल्पितः पूर्ववादिना।
> दद्यात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्।।

रघुनन्दनः अस्य व्याख्यानेन कथयति यत् प्रतिज्ञा नामकभाषा साध्याभि–धायिका भवेत् तदेव परस्परविरुद्धार्थ पदादिभिः वर्जितं भवेत्। अन्यथा प्रतिज्ञा–दोषेण साध्यदोषः भविष्यति दोषी दण्डयुक्तः न भविष्यति। अतः अत्र भट्टाचार्येण किश्चन वचनोद्धृतां भवति–

> वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता।
> असौरेण वक्तव्ये व्यवहारेषु वादिभिः[1]।।

अत्रापि नारदवचनशुद्ध्रियते–

> सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता।
> तत् हानौ हीयते वादी तरंस्तामुत्तरो भवेत्[2]।।

निबन्धकारः अत्र भाषा–प्रतिज्ञा–पक्षयोर्मध्ये अर्थान्तरं कल्पयति अर्थात् पृथक्त्वमस्तीति रघुनन्दनस्य आशयः। परन्तु तत्र भगवता विज्ञानेश्वरेण मिताक्षरायाम् एतेषां मध्ये न पृथक्त्वमिति समुपस्थापितम्। प्रसङ्गेऽस्मिन् किं तत् पार्थक्यमिति उपस्थाप्यते। यथा–भाषायां वादिना यत्तावत् प्रतिज्ञात्वेन उपस्थापयति सा प्रतिज्ञा भाषेति। तत्र अर्थगौरवत्वं यद् विद्यते तत् पक्षता इति यत्र च भाषायां सौरत्वं अर्थात् मिश्रत्वं न विद्यते सा च केवलं पक्षता इति रघुनन्दनेन उपस्थापितम्[3]।
विज्ञानेश्वरोक्तभाषास्वरूपनिर्णयकाले तस्य स्वल्पाक्षरत्वं निराकुलत्वविषये आलोचनं भवत्यत्र। भाषाशोधनकालविषये अत्र विचारयति स्मृतिभट्टाचार्यः बृहसपतिवचनानुसारं यथा–

न्यूनाधिकं पूर्वपक्षं तावद्वादीविरोधयेत्।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ[4]।।

तल्लिखनप्रकारविषये व्यासवचनोल्लिख्यते अत्र भगवद्भिः–

पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्[5]।।

भाषोपस्थापनकाले राज्ञः कस्यायाः भाषायाः कृते किं कर्त्तव्यमिति विषये अत्रापि निर्णयो भवति। यथा याज्ञवल्क्यानुसारं–

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारः[6]।।

स्वधर्माभिरक्षता राजा मनुष्यवैचित्र्यात् साध्वसाधु वा परीक्ष्य सर्वदा निर्णयो कार्या इति वक्ति रघुनन्दनः। सर्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि मूलव्यवहारात् नावच्छिन्नो भवति पशु–स्त्री–भू–ऋणादानादिषु। अस्मिन् प्रसङ्गे उदाहरणमेकं समुपास्थापितं स्मृतितत्त्वकारेण – यथाहमनेन शिरसि पादेन ताडितः इत्यभिश्वाय केवलं दण्डयः पराजीयते च। ततश्च त्वं मह्यमृणं धारयसि मत्तऋणत्वेन गृहीतत्वात् बन्धकर्त्वादति। सैव भाषा संस्कृतभाषया एव लेखनीयं भवेदिति सः कथयति[7]।
मूर्खाः अपि संस्कृतभाषाक्षेत्रे अज्ञाः भवेयुः। एतदर्थ अध्यापनेऽपि संस्कृतभाषा व्यवहरेत् येन सर्वे संस्कृते भाषालेखितुं सक्षमाः भवेयुः। प्रसङ्गेऽस्मिन् विष्णुधर्मोत्तरपुराणवचनं यथा–

संस्कृतैः प्राकृतैर्वाक्यैर्यः शिष्यमनुरूपतः।
देशभाषाद्युपायैश्च बोधयेत् स गुरुः स्मृतः।।

अनेन प्रकारेण भाषाप्रसङ्गेत्थापनकाले संस्कृतस्य गौरवत्वं विषये दृढोद्घोषयति स्मृतितत्त्वकारः।
भाषापादानन्तरं उत्तरपादस्य विषये आलोचनं भवति। तत्र प्रथमतः उत्तरपादस्य कालविषये कात्यायनवचनम्[8]–

सद्यः कृतेषु कार्य्येषु सद्य एव विवादयेत्।
कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः।।

तत्रापि नारदवचनम्–

गहनत्वाद्विवादानामसामर्थ्यात् स्मृतेरपि।
ऋणादिषु हरेत् कालं कामं तत्त्वबुभुत्सया[9]।।

यदा वादी भाषापक्षं समुपस्थापयति तदा प्रतिवादी तत् पक्षमुपयुक्तम् अन्यवादीत्वेन भत्र्प्रसत्रत् तदुत्तरं दद्यात्। अत्र रघुनन्दनः पञ्चविधहीनविषये उद्धरति।

नारदवचनं यथा–

अन्यवादी क्रियाद्वेषी नोपस्थाता निरूत्तरः।
आहूतः प्रपलापी च हीनः पञ्चविधः स्मृतः।।
प्रपलापी त्रिपक्षेण मौनकृत्सप्तभिर्दिनैः।
क्रियाद्वेषी तु मासेन साक्षिभिन्नस्तु तत्क्षणात्[10]।।

समनन्तरं नारदोक्त–उत्तरस्वरूपं विचारयति अत्र निबन्धकारः तस्य समीचीनं व्याख्यानं विद्याति। तत्रापि कात्यायनौकतं उत्तरभाषं समुद्धृतं भट्टाचार्येण अपि च तस्यैव मिथ्योत्तरं आलोचनावसरे[11] बृहस्पति वचनं यथा–

श्रुत्वाभियोगं प्रत्यर्थी यदि तं प्रतिपाद्यते।
सा तु संप्रतिपत्तिः स्याच्दास्त्रविद्भिरुदाहृताः।।
अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत्।।
आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सौभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते।।

प्रतिपक्षावस्कन्दनात् प्रत्यवस्कन्दनमिति जीमूतवाहनमतुपस्थापयति अत्र भट्टाचार्यपादः। अत्र सः जीमूतवाहनमतावलम्बवनेन नारदमतञ्चानुसृत्य प्रत्यवस्कन्दनस्य त्रिविधत्वं विधाति। यथा–बलवत्तुल्यबलं[12] कारणञ्च । अत्र तेन मिथ्योत्तराणां आलोचनावसरे याज्ञवल्कय–शूलपाणि–भवदेवभट्टादिपूर्वगानां मतान्यनुसृत्य स्वमतञ्च समुपस्थापयति।
उत्तरपादस्य विचारानन्तरं अनेन क्रियापादस्य विचारः क्रियते। उत्तराभिधानानन्तरं क्रियापादं कदा भवति इति विषये अत्र[13] याज्ञवल्क्यबचनोद्धृती भवति। यत् ततोर्थी लेखयेत् सद्यः विषये अनेन महती चर्चा कृता। उभयानुमत एकोऽपि साक्षी भविष्यति इति याज्ञवल्क्यः कथयति। स च एकः साक्षी अलुब्धः धर्मवित् चैव भवेदिति। अत्र सः नारदमन्वादिस्मृतिकाराणां कुल्लूकविश्वरूपादि–निबन्धकाराणामतान्यनुसृत्य निष्कर्षत्वेन समुपस्थापयति। समनन्तरं के असाक्षिणः भवेति[14] तस्य चापवादः, व्यासवचनमनुसृतय उभयानुमते साहसे विशेषतः शुचिक्रियादिगुणयुकतस्य[14] एकस्य ग्राह्यकत्वम्। तस्य कात्यायनविष्णुवचनेन[15] समर्थनम्। कात्यायनवचनानुसारं कुत्र साक्षिं परिक्षेत कुत्र न, नारदानुसारं क्षोत्रियादि–नामसाक्ष्यं[16], दानरत्नाकरे देवलोकश्रोत्रियलक्षणम् मूक्तसाक्षिणं कदा पृच्छेत् इति तस्य कालः स्थानञ्च दूषणं सत्फलञ्चेत्यादि विषये अनेन सुविस्तृतं पर्यालोचितम्। कुत्र साक्षि अनृतं वदेदिति विषये सः याज्ञवल्क्य–गौतमवचनमुद्धरति। ततः कात्यायनदिशा कुत्र सर्वे असाक्षिण भवन्ति तस्य बृहस्पतिवचनेन समर्थनं नारदमते अनवस्थापन, कात्यायनोक्त साक्षिदूषणम्, कस्मिन्नुत्तरे सन्धिः[17] भवेत् प्रतिज्ञातार्थसाधनम्। व्यासवचनमनुसृत्य प्राङ्न्याये कारणे एव क्तियापादस्यावश्यकता अनुभृयते न तु मिथ्योत्तरे इति अत्रापि संश्रियते भट्टावार्येण यथा–

प्राङ्न्याये कारणोक्तौ च प्रतयर्थी साधयेत् क्रियाम्।
मिथ्योत्तरे पूर्ववादी प्रतिपत्तौ न सा भवेत्[18]।।

अतः अर्थी अभियोगसिद्धयर्थं प्रमाणमुपस्थापयति। अत्र च बृहस्पत्यनुसारं[19] क्तियाप्रकारः उल्लिख्यते[20]।

**संदर्भ–ग्रंथ सूचीः**


1. व्यवहारतत्त्वम्, पृ. 202
2. व्यवहारतत्त्व, पृ. 204
3. तत्रैव, पृ. 204
4. तत्रैव, पृ. 204
5. व्यवहारतत्त्वम्, पृ. 204
6. तत्रैव
7. तत्रैव, पृ. 205

8. तत्रैव
9. यवहारतत्त्वमृ, पृ. 205
10. तत्रैव
11. व्यवहारतत्त्वमृ, पृ. 206
12. तत्रैव, पृ. 207
13. व्यवहारतत्त्वमृ, पृ. 208
14. तत्रैव, पृ. 210
15. दासोऽन्धो वधिरः कुष्ठौ स्त्रीवालस्थविरादयः।
    एतेऽप्यनभिसम्बन्धाः साहसे साक्षिणो मताः।। व्य. त. पृ.–213
16. शुचिक्रियाश्च धर्मज्ञो यो न्यत्राप्यनुभुतवाक्।
    प्रमाणमेकोऽपि भवेत् साहसेषु विशेषतः।। व्य. त. पृ. 213
17. ऋणादिषु परीक्षेत साक्षिणः स्थिरकर्मसु।
    साहसात्ययिकेनैव परीक्षा कुत्रचित् स्मृता।। व्य. त. पृ. 214
18. श्रोत्रियास्तापसा वृद्धा ये प्रव्रजिता नराः।
    वचनात्तेष्वसाक्षित्वं नात्र हेतुरुदाहृतः।। व्य. त. पृ. 214
19. पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये।
    द्वयोरुत्तप्तयोः सन्धिः स्यादयः पिण्डयोरिव।। तत्रैव, पृ. 216
20. व्यवहारतत्त्वमृ, पृ. 216